रइकेलिहिअणिअसणकरकिसलअ रुद्धणअणजुअलस्स।
रुद्दस्सतइअणअणंपव्वईपरिचुम्बिअञ्जअइ ॥

अत्र जयतीति नतु शोभत इत्यादि समानेपि हि स्थगनव्यापारे लोकोत्तरेणैव रूपेणास्य पिधानमिति तदेवोत्कृष्टं तथा ॥

प्रेयान्सोयमपाकृतःसशपथं पादानतः कान्तया द्विचाण्येव पदानि. वासभवनाद्यावन्न यात्युन्मनाः। तावत्प्रत्युतपाणिसंपुटलसन्नीवीनिबन्धं धृतोधाविलैव कृतप्रणामकमहो प्रेम्णो विचित्रागतिः ॥

अत्र पदानीति नतु द्वाराणीति तिङ्सुपो र्यथा ॥

पथि पथिशुकचञ्चूचारुशोभाङ्कुराणां दिशिदिशि पवमानोवीरुधांलासकश्च।नरिनरि किरतिद्राक्सायकान्पुष्पधन्वा पुरिपुरि विनिवृत्ता मानिनीमानचर्चा ॥

अत्र किरतीति किरणस्य साध्यमानत्वं निवृत्तेति निवर्त्तनस्यसिद्धत्वं तिङासुपाच तत्रापिक्त प्रत्ययेनातीतत्वं द्योत्यते यथा वा ॥

लिखन्नास्तेभूमिं बहिरवनतः प्राणदयितोनिराहाराः सख्यः सततरुदितोच्छूननयनाः। परित्यक्तं सर्व्वं हसितपठितं पञ्जरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना ॥

अत्र न लिखतीत्यपि तु प्रसादपर्य्यन्तमास्तइति तथा आस्तइति नतु आसितइति भूमिमिति नतु भूमाविति नहि बुद्धिपूर्व्वकं किञ्चिल्लिखती तिङ्सु विभक्तीनां व्यङ्ग्यं ॥ सम्बन्धस्य यथा ॥

गामारुहम्मि गामे वसामि ण अरट्ठिइं ण आणामि । णाअरिआणं पइणोहरेमि जाहोमि साहोमि ॥

अत्र नागरिकाणामिति षष्ठ्याः ॥

रमणीयःक्षत्रियकुमार आसीदिति कालस्य ॥

एषाहि भग्नमहेश्वरकार्मकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः ॥ वचनस्य यथा ॥

ताणंगुणगहणाणं ताणमुउक्कंठाणं तस्सपेमस्सताणं भणिआणं सुन्दरएरिसअं जाअमवसाणं ॥

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यते ॥ पुरुषव्यत्ययस्य यथा ॥

रेरे चञ्चललोचनाञ्चितरुचे चेतः प्रमुच्य स्थिरप्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि किंमन्ये विहरिष्यसे बत हतांमुञ्चान्तराशामिमामेषा कण्ठतटे कृता खलुशिलासंसारवारां निधौ ॥

अत्र प्रहासः ॥ पूर्वनिपातस्य यथा ॥

येषां दोर्वलमेव दुर्बलतया ते सम्मतास्तैरपि प्रायः केवल नीतिरीतिशरणैः कार्य्यं किमुर्व्वीश्वरैः। येक्षाशक पुनःपराक्रमनयस्वीकारकान्तक्रमास्तेस्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परं ॥

अत्र पराक्रमस्य प्राधान्यं गम्यते विभक्तिविशेषस्य यथा ॥

प्रधनाध्वनिधीरधनुर्ध्वनिभृतिविधुरैरयोधि तव दिवसं। दिवसेन तु नरपभवानयुद्धविधिसिद्धसाधुवादपदं ॥

अत्र दिवसेनेत्यवपर्गे तृतीयाफलप्राप्तिं द्योतयति ॥

भूयोभूयः सविधनगरीरथ्ययापर्य्यटन्तं दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था। साक्षात्कामं नवमिव रतिर्मालती माधवं यत् गाढोत्कण्ठाललितललितैरङ्गकैस्ताम्यतीति ॥

अत्र अनुकम्पावृत्तेः कप्रत्ययतद्धितस्य ॥

परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं योन गतवान्। विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यन्तर्जडयति च तापञ्च कुरुते ॥

अत्र प्रशब्दस्योपसर्गस्य ॥

हतश्च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो

द्विषः। तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां॥

अत्र तुल्ययोगिताद्योतकस्य च इति निपातस्य॥

रामोसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तं। वन्दीवैष यशांसि गायति मरुद्यस्यैकवाणाहतिश्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥

अत्रासाविति भुवनेष्विति गुणैरिति सर्व्वनामवचनप्रातिपदिकवचनानां नत्वदिति न मदिति अपि त्वस्मदित्यस्य सर्वाक्षेपिणः। भाग्यविपर्य्ययादिति। अन्यथा सम्पत्तिमुखेन नत्वभावमुखेनाभिधानस्य॥

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे। अधिवसति सकलललनामौलिरियं चकितहरिणचलनयना॥

अत्र इमनिजव्ययीभावकर्मभूताधाराणां स्वरूपस्य तरुणत्वइति धनुषः समीपइति मौलौवसतीत्यत्र त्वादिभिस्तुल्ये एषां वाचकत्वे अस्ति कश्चित्स्वरूपस्य विशेषोयश्चमत्कारकारी स एव व्यञ्जकत्वं प्राप्नोति॥ एवमन्येषामपि बोद्धव्यं॥ वर्णरचनानां

व्यञ्जकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते ॥ अपिशब्दात्प्रबन्धेषु नाटकादिषु ॥ एवं रसादीनां पूर्व्वगणितभेदाभ्यां सह षड्भेदाः ॥ भेदास्तदेक पञ्चाशत् व्याख्याताः तेषां चान्योन्ययोजनं सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया। नकेवलं शुद्धा एवैक पञ्चाशद्भेदाभवन्ति यावत्तेषां स्वप्रभेदैरेकपञ्चाश तासंशयास्पदत्वेनानुग्राह्यानुग्राहकतयैकव्यञ्ज कानुप्रवेशेन त्रिविधेन सङ्करेण परस्परनिरपेच रूपयैक प्रकारया संसृष्ट्या चेति चतुर्गुणने वेद खाब्धि वियच्चन्द्राः शुद्धभेदैः सह शरेषु युगखे न्दवः ॥ तत्र दिङ्मात्रमुदाह्रियते ॥

खणपाहुणिआदेअरजाआएसुहअकिम्पिदेभणिआ। रुअ इपडोहरवलहीघरम्मिअणुणिज्जउवराई ॥

अचानुनयः किमुपभोगलचणेर्थान्तरेसंक्रमितः किमनुरणनन्यायेनोपभोगएव व्यङ्ग्यो व्यञ्जकइति संदेहः ॥

स्निग्धश्यामलकान्तिलिप्तवियतोवेल्लद्बलाकाघना वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः। कामंसन्तु दृढं कठोर हृदयोरामोस्मि सर्वंसहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥

अत्र लिप्तेति पयोदसुहृदामिति चात्यन्ततिरस्कृत वाच्ययोः संसृष्टिः । ताभ्यां सह रामोऽस्मीत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपद लक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसंक्रमितवाच्यरसध्वन्योः सङ्करः । एवमन्यदप्युदाहार्य्यं ॥ इति काव्यप्रकाशे ध्वनिनिर्णयोनाम चतुर्थ उल्लासः ॥

एवं ध्वनौ निर्णीते गुणीभूतव्यङ्ग्यप्रभेदानाह ॥

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटं । सन्दिग्ध तुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरं । व्यङ्ग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदाः स्मृताः ॥ कामिनीकुचकलशवत् गूढं चमत्करोत्यगूढन्तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव ॥ अगूढं यथा ॥

यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचिव्यधव्यतिकरेण युनक्ति कर्णौ । काञ्चीगुणग्रथनभाजनमेषसोऽस्मि जीवन्न संप्रति भवामिकिमावहामि ॥

अत्र जीवन्नित्यर्थान्तरसंक्रमितवाच्यस्य ॥

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा गायन्ति मञ्जु मधुपा गृह दीर्घिकासु । एतच्चकास्ति च रवेर्नवबन्धुजीवपुष्पच्छदाभमुदयाचलचुम्बिबिम्बं ॥

अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य॥

आसीत्फणिपाशबन्धनविधिः शक्त्या तु ते देवरे गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः। दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी॥

अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्य तस्याप्यत्रेति युक्तः पाठः॥ अपरस्य रसादेर्वाच्यस्य वाक्यार्थीभूतस्याङ्गं रसादि अनुरणनरूपं वा॥

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥

अत्र शृङ्गारः करुणस्य॥

कैलासालयभाललोचनरुचा निर्वर्तितालक्तकव्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायतां। स्पर्द्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्य्यते॥

अत्र भावस्य रसः॥

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधयस्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः। आश्चर्य्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः॥

अत्र भूविषयोरत्याख्योभावोराजविषयस्य रति भावस्य॥

वन्दीकृत्य नृपद्विषां मृगदृशस्ताः पश्यतां प्रेयसां श्लिष्यन्ति प्रणमन्ति लान्तिपरितश्चुम्बन्ति ते सैनिकाः। अस्माकं सुकृतै र्दृशोर्निपतितो । स्यौचित्यवारांनिधेर्विध्वस्ताविपदोखिलास्त दिति तैः प्रत्यर्थिभिःस्तूयसे॥

अत्र भावस्य रसाभासभावाभासौ प्रथमद्विती यार्द्धद्योत्यौ॥

अविरलकरवालकम्पनैर्भृकुटीतर्जनगर्जनैर्मुहुः। ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात्॥

अत्र भावस्य भावप्रशमः॥

साकं कुरङ्गकदृशा मधुपानलीलां कर्त्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते। अन्याभिधायि तवनाम विभोगृहीतं केनापि तत्र विषमामकरोदवस्थां॥

अत्र त्रासोदयः॥

असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विस्रम्भे ष्वथ च रसिकः शैलदुहितुः। प्रमोदं वोदिश्यात्कपटवदुवेषा पनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥

अत्रा वेगधैर्य्ययोः सन्धिः॥

पश्येत्कश्चिच्चलचपलरे कात्वराहं कुमारी हस्तालम्बं वितर
हहहा व्युत्क्रमः क्वासि यासि। इत्थं पृथ्वीपरिवृढभवद्विद्विषो
रण्यवृत्तेः कन्याकञ्चित्फलकिसलयान्याददानाभिधत्ते ॥

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सु
क्यानां शबलता ॥ एते च रसवदाद्यलङ्काराः
यद्यपि भावोदयभावसन्धिभावशबलत्वानि नालङ्का
रतयोक्तानि तथापि कश्चिद्ब्रूयादित्येवमुक्तं यद्यपि
स नास्ति कश्चिद्विषयोयत्र ध्वनिगुणीभूतव्यङ्ग्ययोः
स्वप्रभेदादिभिः सह सङ्करः संसृष्टिर्वा नास्ति
तथापि प्राधान्येन व्यपदेशा भवन्तीति क्वचित्केन
चिद्व्यवहारः ॥

जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया वचोवैदेहीति
प्रतिपदमुदश्रुप्रलपितं। कृता लङ्काभर्त्तुर्वदनपरिपाटीषु
घटनामयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥

अत्र शब्दशक्तिमूलाऽनुरणनरूपोरामेण सहोप
मानोपमेयभावोवाच्याङ्गतां नीतः ॥

आगत्य संप्रति वियोगविसंष्ठुलाङ्गीमम्भोजिनीं क्वचिदपि
क्षपितत्रियामः। एतां प्रसादयति पश्य शनैःप्रभाते तन्वङ्गि
पादपतनेन सहस्ररश्मिः ॥

अत्र नायकवृत्तान्तोऽध्यारोपणेनैव स्थितः ॥ वाच्यसिध्यङ्गं यथा ॥

भ्रमिमरतिमलसहृदयतां प्रलयंमूर्छांतमःशरीरसादं । मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनां ॥

अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत् ॥ यथावा ॥

गच्छाम्यच्युतदर्शनेन भवतः किं तृप्तिरुत्पद्यते किं त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा । इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसामाश्लिष्यन् पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ॥

अत्र अच्युतादिपदव्यङ्ग्यमामन्त्रणेत्यादि वाच्यस्य। एतच्चैकत्र एकवक्तृगतत्वेन अपरत्र भिन्न वक्तृगतत्वेनेत्यनयोर्भेदः ॥ अस्फुटं यथा॥

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता। नादृष्टेन न दृष्टे न भवता लभ्यते सुखं ॥

अत्रादृष्टोयथा न भवसि वियोगभयञ्च यथा नोत्पद्यते तथाकुर्य्या इति क्लिष्टं। सन्दिग्धप्राधान्यं यथा ॥

हरस्तु किञ्चित्परिवृत्तधैर्य्यश्चन्द्रोदयारम्भइवाम्बुराशिः। उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥

अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं विलोकनव्यापारणं वा वाच्यं प्रधानमिति सन्देहः। तुल्यप्राधान्यं यथा॥

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते॥

अत्र जामदग्न्यः सर्व्वेषां क्षत्रियाणामिव रक्षसां क्षणात्क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च दुर्मनस्त्वस्य समं प्राधान्यं॥ काक्वाक्षिप्तं यथा॥

मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन॥

अत्र मथ्नाम्येवेत्यादिव्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितं॥ असुन्दरं यथा॥

वाणीरकुडंगुड्डीणसउणि कोलाहलं सुणन्तीए। घरकम्मवावडाए वहुएसीअन्ति अङ्गाइं॥

अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्टइति॥ व्यङ्ग्यात्सीदन्त्यङ्गानीति वाच्यंसचमत्कारं॥ एषां भेदा यथायोगं वेदितव्याश्च पूर्व्ववत्॥ यथायोगमिति व्यज्यन्ते वस्तुमात्रेण यदालंकृतयस्तदा। ध्रुवं ध्वन्यङ्गतातासां काव्यवृत्तेस्तदाश्रयात्॥ इति

ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारोव्य
ज्यते न तत्र गुणीभूतव्यङ्ग्यत्वं॥ सालङ्कारैर्ध्वनेस्तैश्च
योगः संसृष्टिसङ्करैः। सालंकारैरिति तैरेवालङ्कारैः
अलङ्कारयुक्तैश्च तैः तदुक्तं ध्वनिकृता॥ सगुणी
भूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः॥ सङ्कर
संसृष्टिभ्यां पुनरप्युद्योतते बहुधेति॥ अन्योन्ययो
गादेवं स्यात् भेदसङ्ख्यातिभूयसी॥ एवमनेनप्रका
रेणअवान्तरभेदगणने अतिप्रभूततरा गणना॥
तथाहि ॥ शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यं
का गणना तु सर्व्वेषां सङ्कलनेन । पुनरस्य
ध्वनेस्त्रयोभेदाः व्यङ्ग्यस्य त्रिरूपत्वात् ॥ तथाहि ॥
किञ्चिद्वाच्यतां सहते किञ्चित्त्वन्यथा॥ तत्र वाच्यता
सहमविचित्रं विचित्रं चेति॥ अविचित्रं वस्तुमात्रं
विचित्रं त्वलङ्कारयुक्तं ॥ यद्यपि प्राधान्येन तदल
ङ्कार्य्यं तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते॥
रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः॥ सहि रसा
दिशब्देन शृङ्गारादि शब्देन वाऽभिधीयेत ।
नचाभिधीयते तत्प्रयोगेपि विभावाद्यप्रयोगे तस्या
प्रतिपत्तेस्तदप्रयोगेपि विभावादिप्रयोगेप्रतिपत्तेश्चे
त्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रती

यतइति निश्चीयते तेनासौ व्यङ्ग्यएव ॥ मुख्यार्थ बाधाद्यभावान्न पुनर्लक्षणीयः ॥ अर्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपव्यङ्ग्यं विना लक्षणैव न भवतीति प्राक् प्रतिपादितं शब्दशक्तिमूले तु अभिप्रायानियन्त्रणेनानभिधेयस्यार्थान्तरस्य तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वं। अर्थशक्तिमूलेपि विशेषे संकेतः कर्त्तुं न युज्यत इति। सामान्यरूपाणां पदार्थानामाकाङ्क्षासन्निधियोग्यता वशात्परस्परसंसर्गो यत्रापदार्थोपि विशेषरूपोवाक्यार्थस्तत्राभिहितान्वय वादे कावार्त्ता व्यङ्ग्यस्याभिधेयतायां येप्याहुः। शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति। श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥१॥ अन्यथानुपपत्त्या तु बोधेच्छक्तिं दयात्मिकां। अर्थापत्त्यावबुध्यन्ते सम्बन्धन्त्रिप्रमाणकमिति प्रतिपादितदिशा देवदत्तगामानय इत्याद्युत्तमवृद्धवाक्यप्रयोगाद्देशाद्देशान्तरंसास्नादिमन्तमर्थं मध्यमवृद्धे नयति सत्यनेनास्माद्वाक्यादेवंविधोर्थः प्रतिपन्नइति तच्चेष्टयानुमायतयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्य

वाचकभावलक्षणसम्बन्धमवधार्य्य बालैस्तत्रं व्युत्प द्यते ॥ परतश्चैव गामानयदेवदत्ताश्वमानय देव दत्त गां नयेत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयतीति अन्वयव्यतिरेकाभ्यां प्रवृत्ति निवृत्तिकारिवाक्यमेव प्रयोगयोग्यमिति वाक्य स्थितानामेव पदानां अन्वितैः पदार्थैः अन्वितानाम मेव संकेतोगृह्यते इति विशिष्टा एव पदार्था वाक्यार्थोनतुपदार्थानां वैशिष्ट्यं ॥ यद्यपि वाक्या न्तरप्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवै तानि पदानीति निश्चीयन्तइति पदार्थान्तरमात्रे णान्वितः पदार्थः संकेतगोचरस्तथापि सामान्या वच्छादितोविशेषरूपोऽसौ प्रतिपद्यते व्यतिष क्तानां पदार्थानां तथाभूतत्वादित्यन्विताभिधा नवादिनः ॥ तेषामपि मते सामान्यविशेष रूपः पदार्थः संकेतविषयइत्यतिविशेषभूतोवाक्या र्थोन्तरगतोसङ्केतितत्वादवाच्य एव यत्र पदार्थः प्रतिपद्यते॥ तत्रदूरे अर्थान्तरभूतस्य निःशेषच्युते त्यादौ विध्यादेश्चर्चा। अनन्वितोर्थोऽभिहितान्वये पदार्थान्तरमात्रेणान्वितस्त्वन्विताभिधाने। अन्वित

विशेषस्त्ववाच्य एवेत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः॥ यदप्युच्यते। नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यन्त इति तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा शब्दस्य प्रकाशकत्वान्न कारकत्वं। ज्ञापकत्वन्तु अज्ञातस्य कथं। ज्ञातत्वं च सङ्केतेनैव सचान्वितमात्रे एवञ्च निमित्तस्य नियतत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य प्रतीतिरेव कथमिति नैमित्तिकानुसारेण निमित्तानि कल्प्यन्त इति अविचारिताभिधानं येऽप्यभिदधति सोयमिषोरिव दीर्घदीर्घतरो व्यापार इति यत्परः शब्दः स शब्दार्थ इति च विधिरेवात्र वाच्य इति तेऽप्यतात्पर्यज्ञास्तात्पर्य्यवाचोयुक्तेर्देवानां प्रियाः॥ तथाहि॥ भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियानिर्वर्त्तकस्वक्रियाभिसम्बन्धात्साध्यायमानतां प्राप्नुवन्ति। ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद्विधीयते यथा ऋत्विक् प्रचरणे प्रमाणान्तरात्सिद्धे लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यत्र लोहितोष्णीषत्वमात्रं विधेयं हवनस्यान्यतः सिद्धे

दध्ना जुहोतीत्यादौ दध्यादेःकरणत्वमात्र विधेयं क्वचिदुभयविधिः क्वचित्त्रिविधिरपि यथा रक्तं पटं वयेत्यादौ एकविधिर्द्विविधिस्त्रिविधिर्वा ॥ ततश्च यदेव विधेयन्तत्रैव तात्पर्य्यमित्युपात्तस्यैव शब्दस्यार्थे तात्पर्य्यं नतु प्रतीतमात्रे एवं हि पूर्व्वोधावतीत्यादौ अपरार्थेपिक्वचित्तात्पर्य्यं स्यात्॥ यत्तु विषं भक्षय माचास्य गृहेभुङ्क्था इत्यत्र एतद्गृहे न भोक्तव्यमित्यत्र तात्पर्य्यमिति सएववाक्यार्थइत्युच्यते। तत्र चकार एववाक्यतासूचनार्थः। नचाख्यातवाक्ययोर्द्वयोरङ्गाङ्गिभाव इति विषभक्षणवाक्यस्य सुहृद्वाक्यत्वेनाङ्गता कल्पनीयेति विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्व्वथामास्यगृहे भुङ्क्था इतिउपात्तशब्दार्थे एव तात्पर्य्यं॥ यदिच शब्दश्रुतेरनन्तरं यावानर्थोलभ्यते तावति शब्दस्याभिधैव व्यापार स्ततः कथं ब्राह्मण पुत्रस्ते जातोब्राह्मण कन्यका ते गर्भिणीत्यादौ हर्षशोकादीनामपि न वाच्यत्वं ॥ कस्माच्च लक्षणा लक्षणीयेप्यर्थेदीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतिसिद्धेः किमितिच श्रुतिलिङ्गवाक्यप्रकरणस्थानसमा

ख्यानां पूर्व्वपूर्व्वबलीयस्त्वमित्यन्विताभिधानवादेपि विधेरपि सिद्धं व्यङ्ग्यत्वं ॥ किञ्च ॥ कुरु रुचिमिति पदयोर्वैपरीत्ये काव्यान्तर्व्वर्त्तिनि कथं दुष्टत्वं। नह्यत्रासभ्योर्थः पदार्थान्तरैरन्वित इत्यनभिधेय एवेत्येवमादि अपरित्याज्यंस्यात् । यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते तदाऽसाधुत्वादीनांनित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नंस्यात् न चानुपपन्नं सर्व्वस्यैव विभक्ततया प्रतिभासात्॥ वाच्यवाचकभावव्यतिरेकेण व्यङ्ग्यव्यञ्जकताश्रयेण तु व्यङ्ग्यस्य बहुविधत्वात्क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एव विभागव्यवस्था ॥

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः॥

इत्यादौ पिनाक्यादिपदवैलक्षण्येन किमिति कपाल्यादिपदानां काव्यानुगुणत्वं ॥ अपिच ॥ वाच्योर्थः सर्व्वान्प्रतिपत्तॄन् प्रत्येकरूप एवेति नियतोसौ ॥ नहि गतोस्तमर्कइत्यादौ वाच्योर्थः

क्वचिदन्यथा भवति प्रतीयमानस्तु तत्तत्प्रकरण वक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते तथाच ॥

गतोऽस्तमर्क इत्यतः सपत्नप्रत्यवस्कन्ददानावसर इति ॥ अभिसरणमुपक्रम्यतामिति ॥ प्राप्तप्रायस्ते प्रेयानिति । कर्म्मकरणान्निवर्त्तामह इति ॥ सान्ध्यो विधिरुपक्रम्यतामिति ॥ दूरं मागा इति सुरभयो गृहं प्रवेश्यन्तामिति ॥ सन्तापोऽधुना न भवतीति ॥ विक्रेयवस्तूनि संह्रियन्तामिति ॥ नागतोऽद्य प्रेयानित्यादिः ॥

अनवधिर्व्यङ्ग्योऽर्थस्तत्र तत्र भाति वाच्यव्यङ्ग्ययोर्निःशेषेत्यादौ निषेधविध्यात्मना ॥

मात्सर्य्यमुत्सार्य्य विचार्य्य कार्य्यमार्य्याः समर्य्यादमुदाहरन्तु । सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनां ॥

इत्यादौ संशये शान्तशृङ्गार्य्यन्यतरगतनिश्चयरूपेण ॥

कथमवनिपदर्पो यन्निशातासिधारादलनगलितमूर्ध्ना विद्विषां स्वीकृता श्रीः । ननु तव निहतारेरप्यसौ किन्न नीता त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः ॥

इत्यादौ निन्दास्तुतिवपुषः स्वरूपस्य पूर्व्वपश्चाद्भावेन प्रतीतेः कालस्य शब्दाश्रयत्वेन शब्द तदेकदेश तदर्थवर्णसंघटनाश्रयत्वेनचाश्रयस्य शब्दानुशासनज्ञानेन प्रकरणादिसहाय प्रतिभानैर्मल्यसहितेन तेनचावगम इति निमित्तस्य। बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्रचमत्कृत्योश्च करणात् कार्य्यस्य गतोस्तमर्कइत्यादौ प्रदर्शित नयेन संख्यायाः ॥

कस्सवणहोइरोसोदट्ठूणपिआएसव्वणं अहरं। सभमरपउमग्घाइणि वारिअवामे सहसुएण्हिं ॥

इत्यादौ सखी तत्कान्तादिगतत्वेन विषयस्य च भेदेपि यद्यैकत्वं तत्कचिदपि नीलानीलादौ भेदोन स्यात्। उक्तं हि। अयमेवहि भेदोभेदहेतुर्वा यद्विरुद्धधर्म्माध्यासः कारणभेदश्चेति वाचकानामर्थापेक्षा व्यञ्जकानान्तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वं॥ किञ्च वाणीरकुडङ्गेत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूप एव यत्र विश्राम्यति तत्र गुणीभूतव्यङ्ग्येतात्पर्य्यभूतोप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलम्बतामिति॥ ननु रामोस्मिसर्वं

सहइति रामेण प्रियजीवितेन तुकृतं प्रेम्णः प्रिये नोचितमिति रामोसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिंपरामित्यादौ लक्षणीयेप्यर्थेनानात्वं भजते विशेषव्यपदेशहेतुश्च भवति तदवगमश्च शब्दार्था यत्तः प्रकरणादिसव्यपेक्षश्चेति कोयं नूतनः प्रतीयमानोनाम ॥ उच्यते ॥ लक्षणीयस्यार्थस्य नानात्वेप्यनेकार्थशब्दाभिधेयवन्नियतत्वमेव न खलु मुख्येनार्थेनानियतसम्बन्धोलक्षयितुं शक्यते ॥ प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसम्बन्धः अनियतसम्बन्धः सम्बद्धसम्बन्धश्च द्योत्यते नच ॥

अत्ता एत्थणिमज्जइ एत्थअहंदिअसअं पुलोएसु। माप हिअरत्तिअधअसेज्जाएमहणुमज्जिहिसीत्यादौ ॥

विवक्षितान्यपरवाच्येध्वनौ मुख्यार्थबाधस्तत्कथमत्र लक्षणा। लक्षणायामपि व्यञ्जनमवश्यमाश्रयितव्यमिति प्रतिपादितं ॥ यथाच समयसव्यपेक्षाभिधा तथा मुख्यार्थबाधादित्रयसमयविशेषसव्यपेक्षा लक्षणा॥ अतएवाभिधापुच्छभूता सेत्याहुः॥ लक्षणात्मकमेव ध्वननं। तदनुगमेन तस्य दर्शनात्। नच तदनुगतमेव ॥ अभिधानावलम्बनेनापि

तस्य भावान्नचोभयानुसार्य्येव ॥ अवाचकवर्णा नुसारेणापि तस्य दृष्टेः नच शब्दानुसार्य्येव अश ब्दात्मकनेत्रत्रिभागावलोकनादिगतत्वेनापितस्य प्रसिद्धेरित्यभिधातात्पर्य्यलक्षणात्मकव्यापारत्रया तिवर्त्ती ध्वननादिपर्य्यायोव्यापारोऽनपह्नवनीय एव॥ तत्राक्ताएत्थेत्यादौ नियतसम्बन्धः ॥ कस्य वणहोइरोसोइत्यादौ अनियत सम्बन्धः ॥

विपरीअरएलच्छी बह्मणडट्ठणणाहि कमलट्ठं। हरिणो दाहिणणअणं रसाउलाझत्ति ढक्केइ ॥

इत्यादौ सम्बद्ध सम्बन्धः अत्र हि हरिपदेन दक्षिण नयनस्य सूर्य्यात्मकता व्यज्यते तन्निमील नेन सूर्य्यास्तमयस्तेन पद्मस्य संकोचस्ततोब्रह्मणःस्थ गनं तत्र सति गोप्याङ्गस्यादर्शनेन निर्यन्त्रणं निधु वनविलसितमिति अखण्डबुद्धिनिर्ग्राह्योवाक्यार्थ एवार्थोवाक्यमेव च वाचकमिति येप्याहुस्तैरप्यवि द्यापदपतितैः पदपदार्थकल्पनाकर्त्तव्यैवेति तत्प क्षेप्यवश्य मुक्तोदाहरणादौ विध्यादिर्व्यङ्ग्यएव ननु वाच्यादसंबद्धं तावन्न प्रतीयते। यतःकुतश्चिद्यस्य कस्यचिदर्थस्य प्रतीतेः प्रसंगात्॥ एवञ्च सम्बन्धात्

व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धे अवश्यं न भवतीति व्याप्तत्वेननियतधर्म्मिनिष्ठत्वेन च त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानं यत्तद्रूपः पर्य्यवस्यति ॥ तथाहि ॥

भमधम्मिअ वीसत्थोसो सुणओ अज्जमारिओदेण । गोलाणईकच्छकुडङ्गवासिणा दरिअसीहेण ॥

अत्र गृहेश्वनिवृत्त्याभ्रमणम्विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति यद्यद्भीरुभ्रमणं तत्तद्भयकारण निवृत्त्युपलब्धिपूर्वकं । गोदावरी तीरेच सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः । अत्रोच्यते ॥ भीरुरपि गुरोः प्रभोर्व्वा निदेशेन प्रियानुरागेणान्येन चैवं भूतेन हेतुना सत्यपि भय कारणे भ्रमतीत्यनैकान्तिकोहेतुः ॥ शुनो बिभ्यदपि वीरत्वेन सिंहान्नबिभेतीति विरुद्धोपि गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा ननिश्चितोऽपि तु वचनान्नच वचनस्य प्रमाण्यमस्त्यर्थेनाप्रतिबन्धादित्यसिद्धश्च ॥ तत्कथमेवं विधाद्धेतोः साध्यसिद्धिः ॥ तथा निःशेषच्युतेत्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि तानि कारणान्तरतोपि भवन्ति ॥ अतश्चात्रैव स्नानकार्य्यत्वे

नोक्तानीति नोपभोगएव प्रतिबद्धानि इत्यनैका न्तिकानि ॥ व्यक्तिवादिना चाधमपदसहायाना मेषां व्यञ्जकत्वमुक्तं नचात्राधमत्वं प्रमाणप्रति पन्नमिति कथमनुमानमेवं विधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षत्वेपि प्रकाशत इति व्यक्तिवादिनः पुनस्तद्दूषणं ॥

इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्यसंकीर्ण भेदनिर्णयोनाम पञ्चम उल्लासः ॥०॥

शब्दार्थचित्रं यत्पूर्व्वं काव्यद्वयमुदाहृतं। गुण प्राधान्यतस्तत्र स्थितिःशब्दार्थचित्रयोः॥ ननु शब्द चित्रेऽर्थस्याचित्रत्वमर्थचित्रे वा शब्दस्य ॥ तथा चोक्तं॥ रूपकादिरलङ्कारस्तस्यान्यैर्वहुधोदितः। न कान्तमपि निर्भूषं विभाति वनितानन। रूपकादि मलङ्कारं वाह्यमाचक्षते परे। सुपां तिङाञ्च व्युत्पत्तिंवाचां वाञ्छन्त्यलङ्कृतिं ॥ तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी। शब्दाभिधेयालङ्कार भेदादिष्टं द्वयन्तु न इति शब्दचित्रं यथा॥

प्रथममरुणच्छायस्तावत्ततः कनकप्रभस्तदनु विरहोत्ता म्यत्तन्वीकपोलतलद्युतिः। उदयति ततोध्वान्तध्वंसक्षमः क्षण दामुखे सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

अर्थचित्रं यथा ॥

ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशा मलकाः खलाश्च। नीचाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतामिव न त्यजन्ति ॥

यद्यपि सर्वत्र काव्येऽन्ततोविभावादिरूपतया पर्य्यवसानं। तथापि स्फुटस्य रसस्यानुपलम्भादव्य ङ्ग्यमेतत्काव्यद्वयमुक्तं ॥ अत्र च शब्दार्थालङ्कार भेदाद्बहवोभेदास्ते चालङ्कारनिर्णये निर्णेष्यन्ते ॥

इति काव्यप्रकाशे षष्ठउल्लासः ॥ ० ॥

काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षण माह ॥ मुख्यार्थहतिर्दोषोरसश्च मुख्यस्तदाश्रिया द्वाच्यः उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः हतिरपकर्षः शब्दाद्याद्दत्याद्यग्रहणाद्वर्णरचने॥ विशेषलक्षणमाह ॥ दुष्टंपदं श्रुतिकटुच्युतसंस्कृत्य

प्रयुक्तमसमर्थं निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं । सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थं भवेत्क्लिष्टं । अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव ॥ श्रुतिकटुपरुषवर्णरूपं दुष्टं यथा ॥

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः । आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥

अत्र कार्तार्थ्यमिति ॥ च्युतसंस्कृतिव्याकरणलक्षणहीनं यथा ॥

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डरप्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते । तत्पल्लीपतिपुत्रिकुञ्जरकुलं कुम्भाभयाभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः ॥

अत्रानुनाथत इति । सर्पिषोनाथत इत्यादावाशिष्येव नाथतेरात्मने पदं विहितं । आशिषि नाथ इति अत्र तु याचनमर्थस्तस्मादनु नाथति स्तनयुगमिति पठनीयं ॥ अप्रयुक्तं तथाम्नातमपि कविभिर्नादृतं यथा ॥

यथायन्दारुणाचारः सर्वदैव विभाव्यते । तथा मन्ये दैवतोस्य पिशाचो राक्षसोथवा ॥

अत्र दैवतशब्दो दैवतानि पुंसि वेति पुंस्याम्नातोपि न केनचित्प्रयुज्यते ॥ असमर्थं ॥ यत्तदर्थं पद्यते नच तत्रास्य शक्तिः । यथा ॥

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः । सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरं ॥

अत्र हन्तीति गमनार्थं निहतार्थं यदुभयार्थमप्रसिद्धेऽर्थे प्रयुक्तं । यथा ॥

यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन । मुग्धा साध्वसतरला विलोक्य परिरभ्य चुम्बिता सहसा ॥

अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्ज्वलीकृतरूपोर्थोव्यवधीयते ॥ अनुचितार्थं यथा ॥

तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या । प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥

अत्र पशुपदं कातरतामभिव्यनक्तीत्यनुचितार्थं निरर्थकं पादपूरणमात्रप्रयोजनञ्चादिपदं यथा ॥

उत्फुल्लकमलकेसरपरागगौरद्युतेमम हि गौरि । अभिवाञ्छितं प्रसिद्ध्यतु भगवति युष्मत्प्रसादेन ॥

अत्र हि शब्दः । अवाचकं यथा ॥

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः। अमर्षशून्येन जनस्य जन्तुना न जातहार्द्देन न विद्विषादरः॥

अत्र जन्तुपदमदातर्य्यर्थे विवक्षितं तच्च नाभिधायकं। यथा वा॥

हा धिक्सा किल तामसी शशिमुखी दृष्टा मया यत्र सा तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितं। किं कुर्म्मः कुशले सदैव विधुरो धाता न चेत्तत्कथं तादृग्यामवती मयो भवति मे नो जीवलोकोऽधुना॥

अत्र दिनमिति प्रकाशमयमित्यर्थेऽवाचकं। यच्चोपसर्गसंसर्गादर्थान्तरगतं। यथा॥

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसरकिशलयो मञ्जुमञ्जीरभृङ्गः। भर्त्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापीसम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः॥

अत्र दधदित्यर्थे विदधदिति त्रिधेति व्रीडा जुगुप्सा मङ्गलव्यञ्जकत्वात् यथा॥

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते। तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम्॥ लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे

स्थितः। मुग्धाकुञ्चितानन्नेन दधती वायुं स्थिता तस्य सा भ्रान्त्या धूर्त्ततयाऽथ वा नतिमृते तेनानिशं चुम्बिता ॥ मृदुपवनविभिन्नोमत्प्रियाया विनाशाद्घनरुचिरकलापो निःसपत्नोद्य जातः। रतिविगलितबन्धे केशपाशे प्रियायाः सति कुसुमसनाथे कं हरेदेष वर्ही ॥

एषु साधनवायुविनाशशब्दा व्रीडादिव्यञ्जकाः संदिग्धं यथा ॥

आलिङ्गितस्तत्र भवान् संपराये जयश्रिया। आशीःपरम्परां वन्द्यां कर्णेकृत्वा कृपां कुरु ॥

अत्र वन्द्यां किं हठहृतमहिलायां किं वा नमस्यामिति सन्देहः ॥ अप्रतीतं यत्केवले शास्त्रे प्रसिद्धं यथा ॥

सम्यक्ज्ञानमहाज्योतिर्दलिताशयताजुषः। विधीयमानमप्येतन्न भवेत्कर्मबन्धनं ॥

अत्राशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः ॥ ग्राम्यं यत्केवले लोके स्थितं यथा ॥

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखं। तपनीयशिलाशोभा कटिश्च हरते मनः ॥

अत्र कटिरिति नेयार्थं ॥ निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्। क्रियन्ते साम्प्रतं काश्चित्का

ष्विन्नैव त्वशक्तित इति॥ यन्निषिद्धं लाक्षणिकं॥ यथा॥

शरत्कालसमुल्लासि पूर्णिमाशर्व्वरीप्रियं। करोति ते मुखं तन्वि चपेटापातनातिथिं॥

अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते॥

अथ समासगतमेव दुष्टमिति सम्बन्धः। अन्यत्केवलं समासगतञ्च॥ क्लिष्टं यत्रार्थप्रतिपत्तिर्व्यवहिता॥ यथा॥

अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः। सदृशं शोभते ऽत्यर्थं भूपाल तव चेष्टितं॥

अत्र अत्रिलोचनसंभूतस्य चन्द्रस्य ज्योतिरुद्गमेन भासिभिः कुमुदैरित्यर्थः। अविमृष्टः प्राधान्येनानिर्दिष्टोविधेयांशोयत्र तत् यथा॥

मूर्द्धामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधाराधौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नां। कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः॥

अत्र मिथ्यामहिमत्वं नानुवाद्यं अपितु विधेयं। यथा वा॥

खलां नितम्बादवलम्बमानां पुनःपुनः केसरपुष्पकाञ्चीं।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्व्वीमिव कार्मुकस्य॥

अत्र द्वितीयत्वमात्रमुत्प्रेक्षितं मौर्वीन्द्वितीया मिति युक्तः पाठः यथा वा॥

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥

अत्रालक्षिताजनिरिति वाच्यं यथावा॥

आनन्दसिन्धुरतिचापलशालिचित्तसंदाननैकसदनं क्षण मप्यमुक्ता। या सर्व्वदैव भवता तदुदन्तचिन्ता तान्तिं तनोति तव सम्प्रति धिग्धिगस्मान्॥

अत्र न मुक्तेति निषेधोविधेयः यथा॥

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः सुरधनुरिदं दूराकृष्टं न तस्य शरासनं। अयमपि पटुर्धारासारोन बाण परम्परा न कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी॥

इत्यत्र नत्वमुक्तानुवादेनान्यदत्र किञ्चिद्वि हितं यथा॥

जुगोपात्मानमत्रस्तोभेजे धर्म्ममनातुरः। अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत्॥

इत्यत्र अत्रस्तत्वाद्यनुवादेनात्मनोगोपनादिः। विरुद्धमतिकृद्यथा॥

सुधाकरकराकारविशारदविचेष्टितः । अकार्य्यमित्रमेकोसौ तस्य किं वर्णयामहे ॥

अत्र कार्य्यं विना मित्रमिति विवक्षितं अकार्य्येषु मित्रमिति प्रतीतिः यथा वा ॥

चिरकालपरिप्राप्तिलोचनानन्ददायिनः । कान्ता कान्तस्य सहसा विदधाति गलग्रहं ॥

अत्र कण्ठग्रहमिति वाच्यं ॥

न त्रस्तं यदि नाम भूतकरुणा सन्तानशान्तात्मनस्तेन व्यारुजता धनुर्भगवतोदेवाद्भवानीपतेः । तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः स्कन्दः स्कन्दइव प्रियोहमथवा शिष्यः कथं विस्मृतः ॥

अत्र भवानीपतिशब्दोभवान्याः पत्यन्तरे प्रतीतिं करोति यथावा ॥

गोरपि यद्वाहनतां प्राप्तवतः सोपि गिरिसुतासिंहः । सविधेनिरहङ्कारःपायाद्वःसोम्बिकारमणः ॥

अत्राम्बिकारमणइति विरुद्धां धियमुत्पादयति ॥

श्रुतिकटु समासगतं यथा ॥

सा दूरे चसुधासान्द्रतरङ्गितविलोचना । वर्हिनिर्ह्रादनार्होयं कालश्च समुपागतः ॥

एवमन्यदपि ज्ञेयं। अपास्य च्युतसंस्कारमसम र्थंनिरर्थकं। वाक्येपि दोषाः सन्त्येते पदस्यांशेपि केचन॥ केचन न पुनः सर्व्वे क्रमेणोदाहरणं॥

सोध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत्सममंस्त बन्धून्। व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च॥ ददातु वो दुःश्रवनो भावुकानां परम्परां। अनेडमूकताद्यैश्च द्यतु दोषैरसंमतान्॥

अत्र दुःश्रवनइन्द्रः अनेडमूकोमूकवधिरः॥

सायकसहायवाहोर्मकरध्वजनियमितक्षमाधिपतेः। अब्जरुचि भास्वरस्तेभातितरामवनिपश्लोकः॥

अत्र सायकादयः शब्दाः खड्गाब्धिभूचन्द्र पर्य्यायाः शराद्यर्थतया प्रसिद्धाः॥

कुविन्दस्त्वं तावत्पटयसि गुणग्राममभितोयशोगायन्त्येते दिशिदिशि च नग्नास्तव विभो। शरज्ज्योत्स्नागौरस्फुटविकट सर्वाङ्गसुभगा तथापि त्वत्कीर्त्तिर्भ्रमति विगताच्छादनमिह॥

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन्नु पश्लोक्यमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थः॥

प्राभ्रभ्राड्विष्णुधामाप्य विषमाश्वः करोत्ययं। निद्रां सहस्रपर्णानां पलायनपरायणां॥

अत्र प्राश्वभाङ्विष्णुधामविषमाश्वनिद्रापर्ण शब्दाः प्रकृष्टजलदगगनसप्ताश्वसङ्कोचपत्राणाम वाचकाः ॥

नृपतेरुपसर्पन्ती कम्पना वामलोचना। तत्तत्प्रहणनोत्सा हवतीमोहनमादधौ ॥

अत्रोपसर्पणप्रहणनमोहनशब्दा व्रीडादायित्वादश्लीलाः ॥

तेन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते। इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्त्तनं ॥

अत्र वान्तोत्सर्गप्रवर्त्तनशब्दा जुगुप्सादायिनः ॥

पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे। भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकं ॥

अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादि प्रतीतावमङ्गलार्थत्वं ॥

सुरालयोल्लासपरः प्राप्तपर्य्याप्तकम्पनः। मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यते ॥

अत्र किं सुरादिशब्दा देवसेनाशरविभूत्यर्थाः। किं मदिराद्यर्था इति सन्देहः ॥

तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः। दृढभूमिः प्रियप्राप्तौ यत्नः सफलितः प्रभो ॥

अत्राभिमाचोपायादयः शब्दाः योगशास्त्रमात्र प्रयुक्तत्वादप्रतीताः ॥

ताम्बूलभृतगल्लोयं भल्लं जल्पति मानुषः । करोति खादनं पानं सदैव तु यथा तथा ॥

अत्र गल्लादयः शब्दा ग्राम्याः ॥

वस्त्रवैडूर्य्यचरणैः चतसत्त्वरजः परा । निष्कम्पा रचिता नेत्रद्वन्द्वं बोधय साम्प्रतं ॥

अत्राम्बररत्नपादैः चततमाः अचला भूः कृता नेत्रद्वन्द्वं बोधयेति नेयार्थता ॥

धम्मिल्लस्य न कस्य प्रेक्ष्यनिकामकुरङ्गशावाच्याः । रज्यत्य पूर्व्वबन्धव्युत्पत्तेर्मानसं शोभा ॥

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे क्लिष्टत्वं ॥

न्यक्कारोह्ययमेव मे यदरयस्तत्राप्यसौ तापसः सोप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः । धिक् धिक् शक्रजितं प्रबोधितवता किङ्कुम्भकर्णेन वा स्वर्गग्रामटिकाविलुण्ठनवृथो च्छूनैः किमेभिर्भुजैः ॥

अत्रायमेव न्यक्कार इति वाच्यं उच्छूनत्वमात्रं चानुवाद्यं न वृथात्वविशेषितं अत्र च शब्दरच

नाविपरीतात्कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य ॥ यथा वा ॥

अपाङ्गसंसर्गितरङ्गिते दृशोर्भ्रुवोररालान्तविलासिवेल्लनं । विसारिरोमाञ्चनकञ्चुकं तनोस्तनोति योऽसौ सुभगे तवागतः ॥

अत्र योऽसाविति पदद्वयमनुवाद्यमात्रप्रतीतिकृत् ॥ तथाहि ॥ प्रक्रान्तप्रसिद्धाऽनुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते ॥ क्रमेणोदाहरणं ॥

कातर्य्यं केवला नीतिः शौर्य्यं श्वापदचेष्टितं । अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः। कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥ उत्कम्पिनी भयपरिस्खलितांशुकान्ता ते लोचने प्रतिदिशं विधुरे क्षिपन्ती। क्रूरेण दारुणतया सहसैव दग्धा धूमान्धितेन दहनेन न वीक्षितासि ॥

यच्छब्दस्तूत्तरवाक्यार्थगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षते। यथा ॥

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके। उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानन्विना सा काङ्क्षः यथात्रैव श्लोके आद्यपादयोर्व्यत्यासे द्वयोरु पादाने तु निराकाङ्क्षत्वम्प्रसिद्धं । अनुपादानेपि सामर्थ्यात्क्वचिद्द्वयमपि गम्यते । यथा ॥

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैष यत्नः । उत्पत्स्यतेस्ति मम कोपि समानधर्म्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

अत्र य उत्पत्स्यते तं प्रतीति ॥ एवञ्च तच्छब्दा नुपादानेत्र साकाङ्क्षत्वं॥ नचासाविति तच्छब्दार्थ माह ॥

असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डला यणीः । वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवा गतः ॥

अत्र हि न तच्छब्दार्थप्रतीतिः । प्रतीतौ वा ॥

करवालकरालदोःसहायो युधि योसौ विजयार्जुनैक मल्लः । यदि भूपतिना स तत्र कार्य्ये विनियुज्येत ततः कृतं कृतं स्यात् ॥

अत्र स इत्यस्यानर्थक्यं स्यात् ॥ अथ ॥

योविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः । स्वात्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयं ॥

इतीदंशब्दवददःशब्दस्तच्छब्दार्थमभिधत्त इति उच्यते तच्चैव वाक्यान्तरे उपादानमर्हति न तच्चैव यच्छब्दस्य हि निकटे स्थितः प्रसिद्धं परामृशति । यथा ॥

यत्तदूर्जितमत्युग्रं क्षात्रंतेजोऽस्य भूपतेः । दीव्यताक्षैस्तदानेन नूनं तदपि हारितं ॥

इत्यत्र तच्छब्दः ॥ ननु कथं ॥

कल्याणानां त्वमिह महसामाश्रिये त्वं विधत्से पुण्यां लक्ष्मीमथमयि दृशं देहि देव प्रसीद । यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय ॥

अत्र यद्यदित्युक्त्वा तन्मे इत्युक्तं उच्यते । यद्यदिति येन केनचिद्रूपेण स्थितं सर्व्वात्मकं वस्त्वाक्षिप्तं तथा ॥

किं लोभेन विलङ्घितः स भरतोयेनैतदेवं कृतं भ्रात्रास्तोलघुतां गता किमथ वा मातैव मे मध्यमा । मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्य्यानुजोसौ गुरुर्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतं ॥

अत्रार्य्यस्येति तातस्येति च वाच्यं । नत्वनयोः समासे गुणीभावः कार्य्यः । एवं समासान्तरेष्वप्युदाहार्य्यं विरुद्धमतिकृद्यथा ॥

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्त्तयः । विग्रहक्षपणेनाद्य शेरते ते गतासुखाः ॥

अत्र क्षमादिगुणयुक्ताः सुखमासत इति विवक्षिते हता इति विरुद्धा प्रतीतिः ॥ पदैकदेशे यथासम्भवं क्रमेणोदाहरणं ॥

अलमतिचपलत्वात्स्वप्नमायोपमत्वात्परिणतिविरसत्वात्सङ्गमेन प्रियायाः । इति यदि शतकृत्वस्तत्त्वमालोचयाम स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥

अत्र त्वादिति ॥ यथावा ॥

तद्गच्छ सिद्ध्यै कुरु देवकार्य्यमर्थोयमर्थान्तरलभ्य एव । अपेक्षते प्रत्ययमङ्गलब्ध्यै वीजाङ्कुरः प्रागुदयादिवाम्भः ॥

अत्र ब्ध्यै इति कष्टं ॥

यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्व्विभर्त्ति । बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्तां ॥

अत्र मत्ताशब्दः क्षीवार्थेननिहतार्थः ॥

आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासितप्रोत्सर्प्यद्विरहानलेन च ततः सन्तापितानां दृशां । सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो भल्लीनामिव पानकर्म्म कुरुते कामं कुरङ्गेक्षणा ॥

अत्र दृशामिति बहुवचनं निरर्थकं कुरङ्गेच्च णाया एकस्याएवोपादानात् नचालसवलितेत्यादि बहुव्यापारभेदाद्बहुत्वं॥ व्यापाराणामनुपात्तत्वात्॥ नच व्यापारेऽत्र दृक्शब्दोवर्त्तते॥ अत्रैव कुरुत इत्यात्मनेपदमप्यनर्थकम्। प्रधानक्रियाफलस्य कर्त्रसम्बन्धे कर्त्रभिप्रायक्रियाफलाभावात्॥

चापाचार्य्यस्त्रिपुरविजयी कार्त्तिकेयोविजेयः शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः। अस्त्येवैतत्किमु कृतवता रेणुकाकण्ठबाधाम्बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः॥

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः॥

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः। परमार्थतः सहृदयं वहति पुनः कालकूटघटितमिव॥

अत्र पेलवशब्दः॥

यःपूयते सुरसरिन्मुखतीर्थसार्थस्नानेन शास्त्रपरिशीलनकीलनेन। सौजन्यमान्यजनिरूर्जितमूर्जितानां सोयं दृशोः पतति कस्यचिदेव पुंसः॥

अत्र पयशब्दः॥

विनयप्रणयैककेतनं सततं योऽभवदङ्ग ताद्दशः ॥ कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥

अत्र प्रेतशब्दः ॥

कस्मिन्कर्म्मणि सामर्थ्यमस्य नोत्तपतेतरां । अयं साधुचरस्तस्मादञ्जलिर्ब्बध्यतामिह ॥

अत्र किं पर्ब्ब साधुकृत साधुषु चरतीति सन्देहः ॥

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः । सुदुर्लभं वचोवाणेस्तेजो यस्य विभाव्यते ॥

अत्र वचःशब्देन गीःशब्दो लक्ष्यते ॥ अत्र खलु न केवलं पूर्ब्बपदं यावदुत्तरपदमपि पर्य्यायपरिवर्त्तनं न क्षमते ॥ जलध्यादावुत्तरपदमेव ॥ वडवानलादौ पूर्ब्बपदमेव ॥ यद्यप्यसमर्थस्यैवाप्रयुक्तादयः केचन भेदास्तथाप्यन्यैरलङ्कारकारैर्विभागेन दर्शिता इति भेदप्रदर्शनेनोदाहर्त्तव्या इति च विभज्योक्ताः ॥ प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धिहतवृत्तं । न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तं ॥ अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यं ॥ अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतं ॥ भग्नप्रक्रममक्रमममत

परार्थं चवाक्यमेव तथा ॥ रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतं प्रतिकूलवर्णं ॥ यथा शृङ्गारे ॥

अकुण्ठोत्कण्ठया पूर्णमाकण्ठङ्कलकण्ठि मां । कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्त्तिमुद्धर ॥ रौद्रे देशः सोयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः। तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥

अत्र हि विकटवर्णत्वं दीर्घसमासत्वं चोचितं यथा ॥

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात्। उज्ज्वालः परशुर्भवतु शिथिलस्त्वत्कण्ठपीठातिथिर्येनानेन जगत्सु खण्डपरशुर्देवा हरः ख्याप्यते ॥

यत्र तु न क्रोधस्तत्र चतुर्थपादाभिधाने तथैव शब्दप्रयोगः । उपहतउत्वं प्राप्तो लुप्तोवाविसर्गो यत्र तत् ॥

धीरोविनीतोनिपुणोवराकारोनृपोत्र सः । यस्य भृत्याबलोत्सिक्ता भक्ताबुद्धिप्रभाविताः ॥

विसन्धिः ॥ सन्धेर्वैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वञ्च यथा ॥

राजन्विभान्ति भवतश्चरितानि तानि इन्दोर्द्युतिं दधति यानि रसातलान्तः । धीर्दोर्बले अतितते उचितार्थवृत्ती आतन्वती विजयसम्पदमेत्यभातः ॥ यथावा ॥ ततउदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः । निजवंशउदात्तकान्तकान्तिर्वत मुक्तामणिवच्चकास्त्यनर्घ्यः ॥

संहितां न करोमीति स्वेच्छया सकृदपि दोषः प्रगृह्यादिहेतुकत्वे त्वसकृत् ॥

वेगादुड्डीय गगने चलण्डामरचेष्टितः । अयमुत्पतते पत्त्रीततोत्रैव रुचिङ्कुरु ॥

अत्र सन्धावश्लीलता ॥

उर्व्व्यसावत्र तर्वालीमर्वन्ते चार्व्ववस्थितिः । नात्रर्जुयुज्यते गन्तुं शिरोनमयतन्मनाक् ॥

हतंलक्षणानुसरणेप्यश्रव्यं अप्राप्तगुरुभावान्तलघुरसाननुगुणञ्च वृत्तं यत्र तत् हतवृत्तं ॥ क्रमेणोदाहरणं ॥

अमृतममृतं कःसन्देहोमधून्यपि नान्यथामधुरमधिकं चूतस्यापि प्रसन्नरसम्फलं । सकृदपि पुनर्मध्यस्थः सन्रसान्तरविज्जनोवदतु यदिहान्यत्स्वादुस्यात्प्रियारदनच्छदात् ॥

अत्र यदिहान्यत्स्वादु इत्यश्रव्यं यथा वा ॥

जं परिहरिउन्तीरइ मणम्मिणमुन्दरत्तणगुणेण । अहण
वरजस्स दोसो पडिवक्खेहिं म्पिपडिवसो ॥

अत्र द्वितीयतृतीयगणौ सकारभकारौ ॥

विकसितसहकारभारहारिपरिमलपुञ्जितगुञ्जितद्विरेफः।
नवकिसलयचारुचामरश्रीर्हरति मुनेरपि मानसंवसन्तः॥

अत्र हारिप्रमुदितसौरभेति पाठोयुक्तः। यथावा॥

धन्यास्तागुणरत्नरोहणभुवोधन्यामृदन्यैव सा सम्भाराः
खलु तेन्य एव विधिना यैरेष सृष्टोयुवा । श्रीमत्कान्तिजुषां
द्विषां करतलात्स्त्रीणां नितम्बस्थलात् दृष्टे यत्र पतन्ति मूढ
मनसामस्त्राणि वस्त्राणि च ॥

अत्र वस्त्राण्यपीति पाठे लघुरपि गुरुतां
भजते ॥

हानृप हाबुध हाकविबन्धो विप्रसहस्रसमाश्रय देव ।
मुग्धविदग्धसभान्तररत्न क्वासि गतः क्व वयञ्च तवैते ॥

हास्यरसव्यञ्जकमेतद्वृत्तम् ॥ न्यूनपदं यथा ॥

तथा भूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां वने व्याधैः
सार्द्धं सुचिरमुषितं वल्कलधरैः । विराटस्यावासे स्थितमनु
चितारम्भनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

अत्रास्माभिरिति खिन्नं इत्यस्मात्पूर्व्वमित्थमिति च ॥ अधिकं यथा ॥

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।
अविरुद्धसमन्वितोक्तियुक्तः प्रतिमल्लास्तमयोदयः स कोपि ॥

अत्राकृतिशब्दः । यथा वा ॥

इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः। यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा ॥

अत्र कृतमिति कृतं प्रत्युत प्रक्रमभङ्गमाव इति॥ तथाच यदपिचन कुरङ्गलोचनानामिति पाठे निराकाङ्क्षप्रतीतिः ॥ कथितपदं यथा ॥

अधिकरतलतल्पं कल्पितस्वापलीलापरिमिलननिमील त्पाण्डिमागण्डपाली । सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव स्मरनरपतिलीलायौवराज्याभिषेकं ॥

अत्र लीलेति ॥ पतत्प्रकर्षं यथा ॥

कः कः कुत्र नघुर्घुरायितघुरीघोरोघुरेच्छूकरः कः कः कं कमलाकरं विकमलं कर्त्तुं करीनोद्यतः। के के कानि बनान्यरण्यमहिषा नोन्मूलयेयुर्यतः सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्त्तते ॥

समाप्तपुनरात्तं यथा ॥

केङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकानां रवो झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः । तन्वङ्ग्याः कञ्चुलिकापसारणभुजक्षेपस्खलत्कङ्कणक्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥

द्वितीयार्द्धगतैकवाचकशेषं प्रथमार्द्धं यथा ॥

मसृणचरणपातं गम्यतां भूः सदर्भा विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः । तदिति जनकपुत्री लोचनैरश्रुपूर्णैः पथि पथिकवधूभिः शिक्षिता वीक्षिता च ॥

अभवन्मतद्योगः सम्बन्धो यत्र ॥

येषान्तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभिर्लीलापानभुवश्च चन्दनतरुच्छायासु यैः कल्पिताः । येषां ऊं कृतयः कृतामरपतिक्षोभाः क्षपाचारिणां किन्तैस्त्वत्परितोषकारि विहितं किञ्चित्प्रवादोचितं ॥

अत्र गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यादित्युक्तनयेन यच्छब्दनिर्देश्यानामर्थानां परस्परसमन्वये तैरित्यत्र विशेष्यस्याप्रतीतिरिति ॥ क्षपाचारिभिरिति पाठे युज्यते समन्वयः ॥

त्वमेवं सौन्दर्या स च रुचिरतायाःपरिचितः कलानां सीमानं परमिह युवामेव भजतः । अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वामतः शेषं यत्स्याज्जितमिह तदानीं गुणि

तथा॥ यथा वा॥ सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितं। कोदण्डेन शराः शरैररिशिरस्तेनापिभूमण्डलं तेन त्वं भवता च कीर्त्तिरतुला कीर्त्त्या च लोकत्रयं॥

अत्राकर्णनक्रिया कर्म्मत्वे कोदण्डं शरानित्यादि। वाक्यार्थस्य कर्म्मत्वे कोदण्डः शरादति प्राप्तं। नच यच्छब्दार्थस्तद्विशेषणं वा कोदण्डादि नच केन केनेत्यादि प्रश्नः यथा वा॥ चापाचार्य्यस्त्रिपुरविजयीत्यादौ भार्गवस्य निन्दायां तात्पर्य्यंकृतवतेति परशौ सा प्रतीयते कृतवत इति तु पाठे मतयोगो भवति। यथावा॥

चत्वारोवयमृत्विजः स भगवान् कर्म्मोपदेष्टा हरिः सङ्ग्रामाध्वरदीक्षितोनरपतिः पत्नीगृहीतव्रता। कौरव्याः पशवःप्रियापरिभवक्लेशोपशान्तिः फलं राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः॥

अत्राध्वरशब्दः समासे गुणीभूत इति न तदर्थः सर्वैः संयुज्यते। तथा॥

जङ्घाकाण्डोरुनालोनखकिरणलसत्केसरालीकरालःप्रत्यग्रालक्तकाभाप्रसरकिसलयोमञ्जुमञ्जीरभृङ्गः। भर्तुर्नृत्तानु

कारे जयति निजतनुस्वच्छलावण्यवापीसम्भूताम्भोधिशोभां विदधदभिनवोदण्डपादो भवान्याः ॥

अत्र दण्डपादगता निजतनुः प्रतीयते भवान्याःसम्बन्धिनीतु विवक्षिता॥ अवश्यंवक्तव्यमनुक्तं यत्र यथा ॥

अप्राकृतस्य चरितातिशयैश्च दृष्टैरत्यद्भुतैरपहृतस्य तथापि नास्था । कोप्येष वीरशिशुकाकृतिरप्रमेयमाहात्म्यसारसमुदायमयः पदार्थः ॥

अत्रापहृतोस्मीत्यपहृतत्वस्य विधिर्व्वाच्यः॥ तथापीत्यस्य द्वितीयवाक्यगतत्वेनैवोपपत्तेः॥ यथावा॥

एषोहिमाद्रितनयामुखपद्मजन्मा प्राप्तःसुरासुरमनोरथदूरवर्त्ती। स्वप्ने निरुद्धघटनाधिगताभिरूपलक्ष्मीफलामसुरराजसुतां विधाय ॥

अत्र मनोरथानामपि दूरवर्त्तीत्यप्यर्थोवाच्यः यथावा॥

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः। कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः॥

अत्रापराधस्य लवमपीति वाच्यं ॥ अस्थानस्थपदं यथा ॥

प्रियेण सङ्ग्रथ्य विपक्षसन्निधावुपाहितां वक्षसि पीवरस्तने। स्रजन्न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥

अत्र काचिन्न जहाविति वाच्यं। यथा ॥

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तःकपोलस्थले। पार्व्वत्या नखलक्ष्म शङ्कितसखीनर्म्मस्मितव्रीतया प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु वः॥

अत्र नखलक्ष्मेत्यतः पूर्व्वं कुटिलाताम्रेति वाच्यं अस्थानस्थसमासं यथा ॥

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः। प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात् फुल्लत्कैरवकोशनिःसरदलिश्रेणी कृपाणीं शशी॥

अत्र क्रुद्धस्योक्तौ समासो न कृतः ॥ कवेरुक्तौ तु कृतः। संकीर्णं यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति ॥

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमं। ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपं॥

अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यति इमं कण्ठे गृहाण मनसस्तमोरूपं कोपं मुञ्चेति एकवाक्यतायान्तु क्लिष्टमिति भेदः॥ गर्भितं॥ यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति॥ यथा॥

परोपकारनिरतैर्दुर्जनैः सह सङ्गतिः। वदामि भवतस्तत्त्वं न विधेया कदाचन॥

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः॥ यथा वा॥

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती। तत्सक्तोऽयं न किञ्चिद्गणयति विदितं ते ऽस्तु तेनास्मि दत्ता भृत्येभ्यः श्रीनियोगाद्गदितुमिव गतेत्यम्बुधिं यस्य कीर्त्तिः॥

अत्र विदितं ते ऽस्त्विति एतत्कृतं प्रत्युत लक्ष्मीस्ततोपसरतीति विरुद्धमतिकृत्॥ मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखमिति प्रसिद्धिमतिक्रान्तं यथा॥

महाप्रलयमारुतक्षुभितपुष्करावर्त्तकप्रचण्डघनगर्जित प्रतिरुतानुकारीमुहुः । रवः श्रवणभैरवः स्थगितरोदसीक न्दरःकुतोद्य समरोदधेरयमभूतपूर्व्वः पुरः ॥

अत्र रवोमण्डूकादिषुप्रसिद्धोनतूक्तविशेषे सिंह नादे ॥ भग्नः प्रक्रमः प्रस्तावोयत्र ॥ यथा ॥

नाथे निशायानियतेर्नियोगादस्तंगते हन्त निशापि याता । कुलाङ्गनानां हि गुणानुरूपं नातः परं भद्रतरं चकास्ति ॥

अत्र गतेति प्रक्रान्ते यातेति प्रकृतेः गतानिशा पीति तु युक्तं । ननु नैकपदं द्विःप्रयोज्यं प्रायेणेत्य न्यत्र कथित पदं दुष्टमिति चेदैवोक्तं तत्कथमे कस्य पदस्य द्विःप्रयोगः ॥ उच्यते उद्देश्यप्रतिनि र्देश्यव्यतिरिक्तोविषयएकपदप्रयोगनिषेधस्य ॥ तद्वति विषये प्रत्युत तस्यैव पदस्य सर्व्वनाम्नोवाप्र योगं विना दोषः ॥ तथाहि ॥

उदेति सविता ताम्रस्ताम्रएवास्तमेति च । सम्पत्तौ च विप त्तौ च महतामेकरूपता ॥

अत्र॰रक्तएवास्तमेतीति यदि क्रियते तदाप दान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयैव प्रति भासमानः प्रतीतिं स्थगयति ॥ अत्र तादृगेवेति वा पाठे न दोषः सर्व्वनाम्नः प्रयोगात् ॥ यथावा ॥